श्री स्वामिनारायणो विजयतेतराम् ॥

Chapter - 7

# श्री स्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## सप्तमोऽध्यायः

( उपसंहारात्मकः )

# श्रीस्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## सप्तमोऽध्यायः

### ७.१ शोधप्रबन्धस्यास्य सामाजिकमवदानम्

भारतोऽयं देशः धर्मप्रधानो वर्तते इति प्रथितमस्ति मतं सर्वेषु विपश्चिद् पश्चिमेषु । देशेऽस्मिन् सर्वे विचारकाः स्वस्वमतसमर्थनं तर्कप्रमाणमाश्रित्य कुर्वन्ति स्म । अत्रत्येषु विचारकेषु तर्कप्रमाणयोः सिंहवनगुप्तिन्यायः प्रवर्तते । न्यायस्यास्यायमर्थो विद्यते यत्-येन प्रकारेण सिंहेन द्वारा वनस्य रक्षा भवति । कश्चनापि सिंहस्य भिया वनस्य छेदनं कर्तनं विनाशनं वा कर्तुं न हि सहसा यतते । अत एव सिंहेन द्वारा वनस्य रक्षा भवति ।

अनेनैव प्रकारेण वनेन द्वारा सिंहस्य रक्षा भवति । वन एव निवसति सिंहः । सिंहस्य रक्षायै वनस्य सत्ता अपेक्षिता भवति । यदि वनं न स्यात्तदा कुत्र निवसेत् सिंहः ? इत्थं परस्परमुभयोर्सिंहवनयोः रक्ष्यरक्षकभावः सुतरामुपपद्यते। अनेनैव प्रकारेणात्रत्त्याः समे आस्तिकाः दार्शनिकाः तर्केण द्वारा प्रमाणस्य पुष्टिं कुर्वन्ति, प्रमाणेन द्वारा तर्काणां युक्तरूपत्वमापादयन्ति । विना तर्कप्रमाणानि प्रमाणिकानां मनस्सुस्थानं न लभते । किञ्चाप्रमाणिकं तर्कं प्रतिष्ठितं न हि भवति । एतस्मादेव कारणाद्भगवान् बादरायणः प्राह-शारीरकमीमांसायाम् - "**तर्काप्रतिष्ठानाद्**[1] "इति । प्रमाणप्रतिकूलस्तर्कः प्रतिष्ठितो न हि भवतीत्यर्थः । यतः तर्कस्य कापीयत्ता नास्ति, प्रमाणविरहितानां तत्प्रति-कूलानां तर्काणां, पूर्वापेक्षयाधिककल्पनाचतुरः तार्किकः स्वपूर्ववर्तिनां तार्किकाणां मतस्य खण्डनं कृत्वा स्वमतस्य स्थापनं करोतीति दृष्टिपथमायाति । अत एव प्रमाणानुकूल एव तर्कः दार्शनिकानां निकाये लब्धसमादरो भवति ।

इत्थंभूता अनेके विचारा अस्मिन् भारतदेशे प्राचूर्येणोपलभ्यन्ते । विचारा एव दर्शनस्य रूपमाप्नुवन्ति । दृश्यते अनेन, दृश्यते यत् तत् वा करणे च भावे ल्युटि कृते दर्शनशब्दो व्युत्पद्यते । अत एव दर्शनानि हि दर्शनस्य साधनभूतानि । दृश्यमाणतत्त्वरूपाणि अपि भवन्ति । दृश्यमानतत्त्वरूपादेव दर्शनशब्दस्य तत्त्वत्रयादिष्वर्थेषु भवति प्रयोगः ।

बहोः प्राचीनादेव कालात् भारतेऽस्मिन्वर्षे औपनिषदानां नास्तिकानां, आस्तिकानां च दर्शनानां प्रचुरः प्रचारः संजातः । वैदिकानामेव दर्शनानां विशदत्वायास्तिकानां दर्शनानामुदयः संजातः । नास्तिकानां दर्शनानां वैदिकदर्शनानां विरोधाय संजात उदयः । एतस्मादेव कारणात् नास्तिकानां दर्शनानां

---

१- ब्रह्मसूत्रम् २/१/११

प्रत्यारव्यानपुरःस्सरमेवास्तिकानि दर्शनानि स्वकीयान् सिद्धान्तान्नुपस्थापयन्ति।

तेषु समेषु दर्शनेषु न्याय-वैशेषिक सांख्य - योगादिकेषु वेदान्तदर्शनमेव प्रबलायते। दर्शनस्यास्य पूर्णरूपेणोपनिषदामेव वचसां प्रामाणिकत्वेन स्वीकारात्। प्रोक्तमपि वेदान्तोनाम- "**उपनिषद्वाक्यं प्रमाणम्**[१]" उपनिषदस्तु आत्मोज्जीवनस्य साधनानामेव विवेचनं कुर्वन्ति स्म । वेदान्तदर्शनं त्रिवर्गमपि आत्मोज्जीवनानुकूलत्वेनैव स्वीकुर्वन्ति। श्रेयोमार्गस्यैवात्र भवति प्राधान्यं न तु प्रेयोमार्गस्य । यतः प्रेयो मार्गो हि भोगप्राबल्यमेव परिवर्धयति । श्रेयोमार्गो हि संसारबन्धान्मुक्तेर्मार्गं प्रशस्तं करोति । अत एव वेदान्तदर्शनस्य स्वेतरसमस्त-दर्शनापेक्षया प्राबल्यं सर्वैरेव सद्विचारकैः स्वीक्रियते ।

केनोपनिषद् एकं वाक्यं वक्ति - **इह चेदवेदीथ सत्यमस्ति नो चेदिहावेदीन्महती विनष्टिः**[२]। अस्य वाक्यस्यायमर्थो विद्यते यत् मानवजीवन-मवाप्यापि येन पुरूषेण तत्त्वपञ्चकस्य जीवेश्वरमायाब्रह्म-परब्रह्माख्यस्य तात्त्विकं ज्ञानं लब्धं तदा तु तस्य जीवनं सफलं जातम्। यदि चेद् तत्त्वपञ्चक ज्ञानविज्ञान-वैदेशिको भूत्वा विषयाणां रूपरसगन्धशब्दारव्यानां भोगप्रावण्ये एव सम्पूर्णं जीवनं यापितं तदा तु महती क्षतिर्जाता । जीवन-स्येदमेवोद्देश्यं वर्तते यत् आत्मलाभ साधनज्ञानप्रापणम्।

अथवा तस्य वाक्यस्यायमप्याशयो भवितुमर्हति यत् यदि जीवनं मानवस्याऽवाप्य प्राप्यस्य परब्रह्मणः, प्रापकस्य जीवस्य, प्राप्तेः साधनानां, प्राप्यस्य प्राप्तेर्विरोधिनां, प्राप्तेः फलस्य ज्ञानं लब्धं चेत्-तदा तु जीवनं सफलं संजातं, नो चेत् मानवजीवनस्य वैयर्थ्यमेव जातम् ।

एतदर्थमेव भवति वेदान्तदर्शनस्य प्रवृत्तिः । यद्यपि समेषामेवास्तिकानां दर्शनानामेतादृश्येव भवति प्रवृत्तिः, अथापि तेषु समेषु दर्शनेषु वेदान्तदर्शनं श्रुतीनां सारभूतत्वात् श्रुतीनां शिरोभागरूपत्वात्, वेदप्रतिपादिततत्त्वानां निर्णयरूपत्वात्; पौरूषेयदर्शनेषु जायमानैः भ्रमप्रमादकरणापाटवविप्रलिप्सारूप-दोषैर्विरहितत्वात् वा शेखरायते ।

वेदान्तदर्शनेऽपि नैक सम्प्रदायाः सन्ति । तेषां सिद्धान्ता अपि भिन्नाः भिन्नाः। यथाऽद्वैतसिद्धान्तः, द्वैतसिद्धान्तः, द्वैताद्वैतसिद्धान्तः, शुद्धाद्वैतसिद्धान्तो, विशिष्टाद्वैतसिद्धान्त इत्यादिकाः । इमे समे सिद्धान्ताः वेदान्तदर्शनस्यैव सन्ति। अत एवेमे तत्तद्दर्शननाम्नाऽप्यभिधीयन्ते। यथाऽद्वैतदर्शनम्, विशिष्टाद्वैतदर्शनम्, शुद्धाद्वैतदर्शनमित्यादिकम् ।

---

१- वेदान्तसारः सदानन्दप्रणीतः

२-केनोपनिषत् २/५

इमानि सर्वाणि दर्शनानि लोके बहोःकालादेव लब्धप्रसाराणि सन्ति, अत एव प्रख्यातान्यपि सन्ति। अनेनैव प्रकारेणेदं श्री स्वामिनारायणदर्शनमपि विद्यते। परञ्च दर्शनमिदं भगवता श्री स्वामिनारायणेनैव प्रवर्तितम्। अत एव नवीनतममपि वर्तते । एतस्मादेव कालाद् पूर्वेभ्यस्तेभ्यः तेभ्यः सर्वेभ्य दर्शनेभ्योऽल्पप्रसरः अल्पप्रसारयुक्तोऽपि वर्तते ।

यद्यपि समग्रे गुर्जरदेशे विदेशेष्वपि दर्शनस्यास्य प्रचुरः प्रचारः सञ्जातः, किन्तु भारतस्यैव वर्षस्य सर्वेषु प्रदेशेषु दर्शनस्यास्य प्रचारः प्रचुरतया न हि संजातः । एतस्य कारणमिदमप्यस्ति – अस्य दर्शनस्य मान्यानि तत्त्वानि कति सन्ति ? कानि च सन्ति ? तेषां तत्त्वानां कीदृशं वैशिष्ट्यं वर्तते ? केन प्रकारेण दर्शनमिदं लौकिकाल्लोकाञ्चोपकरोति ? इत्यादिकं, समाजेन नहि पूर्णतया ज्ञातं वर्तते।

दर्शनेऽस्मिन् स्वीकृतानि यानि तत्त्वानि सन्ति तेषामौचित्यं वर्तते न वा ? वर्तते चेत् तत्र किं प्रमाणम्, नास्ति चेत् कस्मात्; इत्यादिकाः विचाराः एतद्दर्शन विषयकाः नहि सञ्जाताः प्रख्याताः । अत एवापि भारतेऽस्मिन् वर्षे तेषु तेषु प्रदेशेषु दर्शनमिदं नहि लब्धप्रसरमभूत्। समाजे तेषां समेषां प्रश्नानां समाधानं समुचितरूपेण यस्मात् कारणात् शोधप्रबन्धोऽयं करोति तस्मादेव कारणाद् शोधप्रबन्धस्यास्य महत् सामाजिकं अवदानं विद्यते ।

शोधप्रबन्धोऽयं नूनं समेषां जनानां समक्षं श्री स्वामिनारायण-दर्शनाभिप्रेतानां तत्त्वानां स्वरूपस्योन्मीलनं करिष्यति । सर्वेषां तत्त्वजिज्ञासूनां चेतस्सु एतद्दर्शनविषयकं सुदृढं प्रत्ययं समुत्पाद्य तेषां मनःसंतोषकारकं भविष्यतीति शोधप्रबन्धस्य महत् सामाजिकमवदानं प्रथामेष्यति ।

शोधप्रन्धोऽयं समन्वयस्यैव शैलीमनुकरोति; न तु विरोधस्य। एतस्मादेव कारणात् शोधप्रबन्धोऽयं सर्वेषामेव सजातीयानां दर्शनानां कट्वालोचनं विहाय स्वमतस्य उपस्थापने एव विश्वसति। यत्तु नास्तिकानां मतानामत्र प्रत्याख्यानमपि तत्र तत्र कृतं तत्तु प्रत्यनीकस्य प्रणाशाय आवश्यकमिति मामकीना धारणा ।

नदी प्रवहति, स्वकीयेन मार्गेण। तत्र मध्ये कश्चन वृक्षः शिला वाऽऽगत्य, वाद्यां समुत्पाद्य, उत्खादितो भवति । अन्ततः तत्र नद्यस्तु कश्चन दोषो न हि भवति। अनेनैव प्रकारेणास्य दर्शनस्य तत्त्वानां स्वरूपनिरूपणप्रसङ्गे सयूथ्यानां दर्शनानामपि मतं भवति प्रत्यारव्यातं, तदा एतस्य दर्शनस्य को दोषः ? तत्तु स्वाभाविक एव भवति । अत एव शोधप्रबन्धोऽयं समन्वयस्यैव भावनया स्वाभिमतानां तत्त्वानां विवेचने प्रवृत्तः सन् महत्तां मनस्सु स्वामिनारायण-दर्शनाभिमततत्त्वानां स्वरूपोन्मीलनं कृत्वा समाजे समादृतो भविष्यतीति मे दृढीयान् विस्रम्भः ।

## ७.२ प्रस्तुतशोधप्रबन्धस्य वैशिष्ट्यम् ।

अयं शोधप्रबन्धो नैकविधं वैशिष्ट्यं बिभर्ति । सर्वप्रथमं त्वयं प्रबन्धः तानि तानि स्वामिनारायणाभिमतानि तत्त्वानि पृथक् पृथक् अध्यायेषु विभज्य तेषां विवेचनं प्रस्तौति । अत एवाऽध्येतृणामस्याऽऽलोके तत्त्वानां स्वरूपनिर्धारणे कुत्रापि काठिन्यं न भविष्यति ।

अस्मिन् शोधप्रबन्धे तथाविधायाः भाषायाः प्रयोगः कृतो वर्तते, यस्याः अर्थज्ञाने कुत्रापि काठिन्यं नो भवेत् । अस्य भाषायां कुत्रापि अपरिचितानां शब्दानां प्रयोगो नास्ति, अत एव भाषाप्रवाहपूर्णा विद्यते ।

यद्यप्यस्य शोधप्रबन्धस्य मुख्यशीर्षकः स्वामिनारायण-दर्शनाभिमत-तत्त्वविवेचनं वर्तते । परन्तु अस्य दर्शनस्य क इतिहास इति जिज्ञासूनां जिज्ञासा विजृम्भेत, एतदर्थमस्य शोधप्रबन्धस्य प्रथमेऽध्याये, अस्य दर्शनस्य सम्प्रदायस्य परिचयः, तदनन्तरं तेषां तेषां दर्शनानां अपेक्षितः परिचयः; पुनः अस्य दर्शनस्य प्रवर्तकस्य भगवतः श्री स्वामिनारायणस्य परिचयः, तेषां ग्रन्थानां च संक्षिप्ततमः परिचयो निबद्धो वर्तते ।

साकमेवास्य दर्शनस्य ये मुख्याः विवेचकाः, साहित्यसम्वर्धका अभूवन् तेषामपि परिचयोऽत्र सन्निवेशितो विद्यते ।

अस्मिन् सम्प्रदाये निम्नक्रमेण तत्त्वपरिगणनायां कृतायां जीवतत्त्वस्य सर्वप्रथमं विवेचनं क्रियते । यज्जीवस्यैव मोहयित्री माया भवति । मायामुग्धो जीवो भवति संसारी । मायायाः सम्बन्धं विहाय जीव एव मुक्तो भूत्वा भगवतः स्वामिनारायणस्य कृपयाऽऽविर्भूतगुणाष्टकः सन् सेवाया अवसरमपि प्राप्नोति ।

भगवत अन्तरङ्गकैङ्कर्यप्राप्तिरेव मानवजीवनस्य लक्ष्यम् । इत्येतत्सर्वं बोधयितुमेव सर्वप्रथमं जीवतत्त्वस्यैव स्वरूपस्वभावसम्बन्ध-आत्मोज्जीवनस्य साधनादिकानां अध्ययनं क्रियते । जीवस्य स्वरूपादिज्ञानं विना मायायाः परब्रह्मणो वा स्वरूपसम्बन्धादिकं सम्यग् ज्ञातुं न शक्यते इति धियैव जीवतत्त्वस्य प्रप्रथमं विवेचनं सम्प्रदत्तम् ।

मायाजगन्मोहिनी वर्तते । सैव माया प्रकृति - अविद्या-प्रधानम् अशब्दादिकैः शब्दैरभिधीयते दर्शनेषु । यस्मात् कारणादियं समेषां चतुर्विंशति संख्याकानां तत्त्वानां प्रसवित्री वर्तते, तस्माद् हि कारणादियं प्रकृतिशब्देनाभिधीयते । भगवतः श्री स्वामिनारायणस्य शरीरांशविशेषभूतेयं भगवत एव सत्यसंकल्पात् जगत उपादानकारणमपि भवति । अत एवापि प्रकृतिरित्यभिधीयते ।

यस्मात्कारणादयं जीवस्य स्वाभाविकं स्वरूपं तिरोधाय परमात्मानं च तस्य समक्षत तिरोधत्ते तस्मात् कारणादियमविद्येति अभिधीयते।

अहङ्कारममत्त्वेऽविद्यायाः अज्ञानस्वरूपे द्वे स्तः। आभ्यामेव द्वाभ्यां रूपाभ्यां माया जीवान् मोहयित्वा परमात्मपराङ्मुखान् विधाय बाह्यान् करोति। एतस्मादपि कारणादियमविद्येति अभिधीयते।

"**लोकवत्तु लीलाकैवल्यम्**[१]" इति सूत्रानुसारेण लीलाविभूतौ समागत्य यदा भगवान् श्री स्वामिनारायणो लीलारसमनुभवति तदा मायेयं भगवतो लीलायाः प्रधानमुपकरणं भवति, एतस्मादेव कारणादियं प्रधानशब्देनाभिधीयते।

किञ्च प्राकृतिकेषु समेषु चातुर्विंशतिसंख्याकेषु तत्त्वेषु माया प्रधानभूता वर्तते, तेषु सर्वेषु तत्त्वेष्वन्विता च वर्तते तस्मादपि च कारणादियं माया प्रधान शब्देनाभिधीयते। अस्याः जडायाः मायायाः जगत्कारणत्वे शब्दः प्रमाणं नास्ति, अत एवेयमशब्दशब्देनाभिहिता भवति। परमात्माधिष्ठिता, परमात्मनः शरीरांशभूतैव माया जगदुपादानतां याति न तु स्वतन्त्रा इत्याशयो वर्तते मायाया अशब्दशब्देनाभिधाने।

अस्याः मायाशब्देनाभिधानस्य कारणं तु एतस्याः विविधविचित्र-सर्गकरणादेव। "**मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरम्**[२]" इति श्वेताश्वतरोपनिषदः श्रुतिः परब्रह्मणाधिष्ठितत्वं मायाया अभिधते। इयं मायैव श्री स्वामिनारायणदर्शने ज्ञातव्यतया तृतीयं तत्त्वं भवति। इत्येतत्सर्वं सविस्तरं शोधप्रबन्धेऽस्मिन् विवृतमास्ते।

श्री स्वामिनारायणदर्शनाभिमतं द्वितीयमीश्वरतत्त्वं वर्तते। यद्यपि स्वामिनारायणदर्शनानुयायिव्यतिरिक्ताः दार्शनिका ईश्वरस्यैकत्वं, तस्यैव परब्रह्माभिधायित्वं च स्वीकुर्वन्ति, किन्तु स्वामिनारायणदर्शनस्य प्रमुखानां ग्रन्थानां; तेषां प्रमुखविवेचकानां विदुषां मतानामालोके सप्रमाणं सयुक्तिकं-चायमर्थोऽस्ति निरूपितो, यदीश्वराः अनेके सन्ति, न त्वेक एवेश्वरः। "**तमीश्वराणां परमं महेश्वरम्**[३]" इत्यादिकेषु वाक्येषु ईश्वरशब्दस्य बहुवचनान्तप्रयोगोऽपि ईश्वराणां बहुत्वसंख्यां द्योतयतीति सिद्ध्यति।

ईश्वरतत्त्वस्यैतादृशं विवेचनं सर्वेभ्यो दर्शनेभ्यो वैशिट्यविशेषं सूचयति श्री स्वामिनारायण दर्शनस्य।

दर्शनस्यास्यैतदपि वैशिष्टयविशेषं वर्तते यत् परब्रह्मव्यतिरिक्तं परब्रह्मणः शरीरभूतं ब्रह्मतत्त्वं वर्तते। इदं तत्त्वमेकमेव, सेवकश्च भवति परस्य ब्रह्मणोः

---

१-ब्रह्मसूत्रम् २/१/३३
२-श्वेताश्वतरोपनिषत् ४/१०
३-श्वेताश्वतरोपनिषत् ६/७

भगवतः श्री स्वामिनारायणस्य । इदं धामरूपं वर्तते भगवतः । एतस्यापरं नामाक्षरधामापि विद्यते । अस्मिन्नेव धामनि विराजते भगवान स्वामिनारायणः। ब्रह्मण एकत्वेऽपि तत्साधर्म्यापन्नानां मुक्तानामानन्त्यादेकदेशिनो बहुत्वमभिदधति। एतस्माद् दर्शनाद् प्राक् केनापि दार्शनिकेन परस्माद् ब्रह्मणो भिन्नत्त्वेन ब्रह्मतत्त्वस्य विवेचनं नहि कृतम् । इदमपि दर्शनस्यास्य शोधप्रबन्धस्य च वैशिष्ट्यविशेषो वर्तते ।

यद्यपि परब्रह्मतत्त्वं सर्वेषु वेदान्तदर्शनेषु प्रसिद्धं वर्तते । अथाप्यस्य दर्शनस्य; शोधप्रबन्धस्यास्य चैतद्, वैशिष्टयं वर्तते-यदिदं दर्शनं ब्रह्मतत्व विशिष्टाद्वैते ब्रह्मविशिष्टाद्वैतरूपेण विशिष्टम् । कथनस्यैतस्यायमभिप्रायो विद्यते यदक्षरब्रह्म चेतनाचेतनशरीरकं विद्यते । तदपि परब्रह्मणो शरीरभूतं वर्तते । अत एव विशिष्टाद्वैत स्वरूपेणाक्षरब्रह्मणा विशिष्टं परंब्रह्म विद्यते । तदेवाद्वैतं तत्त्वम् । स्वेतरसमस्तवस्तुनियामकञ्च वर्तते । इदमेव परंब्रह्म सम्पूर्णजगतोऽभिन्ननिमित्तो-पादानकारणभूतं वर्तते । अक्षरब्रह्मणोऽपि विशिष्टाद्वैतत्वं परस्य ब्रह्मणः स्वामिनारायणस्य सत्यसङ्कल्पाधीनमास्ते । स्वाभाविकं विशिष्टाद्वैतत्त्वं तु परस्य ब्रह्मण एव ।

प्रकारेणानेन शोधप्रबन्धोऽयं बहुविधानि वैशिष्टयानि बिभर्ति । तेषां वैशिष्ट्यानामुन्मीलनेन नूनं समाजे च श्री स्वामिनारायणदर्शन विषयिणी श्रद्धा समन्विता दृष्टिर्भवित्री । अत एवायं शोधप्रबन्धः वर्तमाने सामाजिके परिवेशे, समाजे श्री स्वामिनारायणदर्शनाभिमततत्त्वानां प्रख्यापनायातीवा वश्यकमासीत्।

## ७.३ प्रस्तुतशोधप्रबन्धस्य भविष्यम्

शीर्षकेणानेन द्वाराऽस्यार्थस्य विचारोऽत्र क्रियते, यत् शोधप्रबन्धस्यास्य भविष्यं कीदृग्भविता । अयमाशयो यत् शोधप्रबन्धोऽयं स्वसदृशस्य कस्यचनापरस्यैतद् दर्शनविषयकस्य, शोधप्रबन्धरचनस्य प्रेरणां दास्यति वा ? भविष्यति काले जना अनेन द्वारा स्वकार्यविरचने आलोकिता भविष्यन्ति वा न हि ? यदि भविष्यन्ति चेत् केषु केषु विषयेषु गवेषणायै प्रेरणाप्रदोऽयं शोधप्रबन्धो भविता ? विषयाश्च के के सन्त्यस्य दर्शनस्य समालोचनीयाः ? न हि भविष्यति चेत्तका का बाधा भविष्यति ? केन प्रकारेण तासां बाधानामपाकरणं कर्तुं शक्यते इत्यादिकाः समे अर्थाः सन्ति विचारणीयास्य शीर्षकस्य ।

यस्मात्कारणात् शोधप्रबन्धोऽयं समेषां स्वामिनारायणाभिमतानां तत्त्वानां यथाशक्यं विचाराणां प्रस्तौति, तस्मादेव कारणात् गवेषुकाणां मनस्सु तेषां समेषां विषयाणां विशदज्ञानायेच्छां तु समुत्पत्स्यत एव । अत एवानागते काले

गवेषकाः दर्शनस्यास्य तत्त्वानां विषये शोधप्रबन्धेनानेन द्वारा दिशातिदेशमवाप्य विशद्विज्ञानावाप्तेरिच्छया प्रयासं करिष्यन्त्येव ।

प्रबन्धेऽस्मिन्, ईश्वरब्रह्मनिरुपणं दर्शनान्तराद् भिन्नमस्ति, तथापि श्रुति तर्कानुकूलत्वान्नापाकर्तुं शक्यतेऽपि तु तद्विषयिकां गवेषणावृत्तिमुत्पादयिष्यति ग्रन्थोऽयम् ।

अत एवानागते काले शोधप्रबन्धोऽयं गवेषकानां कृते प्रकाशस्तम्भस्य कार्यं करिष्यत्येव ।

यतः शोधप्रबन्धोऽयं स्वामिनारायणदर्शनतत्त्वानां, तेषां प्रवर्तकानां, सम्पादकानां, बहुमूल्यानां ग्रन्थानां, येषां चर्चा यावदिदानीं विद्वत्समाजे न हि सञ्जाता तेषामपि चर्चां करोति । अत एव गवेषकाः नूनं तेषां महात्मनां जीवनचरित्रविषये, तेषां कृतीनाञ्च विषये समुत्कण्ठिताः भविष्यन्त्येव; करिष्यन्ति चैतेषां विषये गवेषणाकार्यम् । तदर्थमिममपि शोधप्रबन्धमक्षिलक्ष्यी करिष्यन्ति । अत एवास्य शोधप्रबन्धस्य भविष्यं समुज्जवलमास्ते । अस्तु ।

## ७.४ उपसंहार

अयमध्यायोऽस्य शोधप्रबन्धस्योपसंहारस्वरूपो विद्यते । अध्यायेऽस्मिन् केवलं त्रय एव विषयाः सन्ति निरूपिताः । प्रस्तुतस्य शोधप्रबन्धस्य कानि सामाजिकानि अवदानानि सन्तीति विचारितमस्ति । किञ्चास्य प्रबन्धस्य कानि वैशिष्ट्यानि सन्तीत्यपि निरूपितम् । सर्वस्यान्तेऽस्य शोधप्रबन्धस्य भविष्यमस्ति विचारितम् ।